# Shri Bhutanatha Manasa Ashtakam

# શ્રીભૂતનાથમાનસાષ્ટકમ્

## Document Information

Text title : Shri Bhutanatha Manasa Ashtakam

File name : bhUtanAthamAnasAShTakam.itx

Category : deities_misc, ayyappa, aShTaka

Location : doc_deities_misc

Proofread by : Mohan Chettoor

Latest update : October 8, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 8, 2022

*sanskritdocuments.org*

# શ્રીભૂતનાથમાનસાષ્ટકમ્

શ્રી વિષ્ણુપુત્રં શિવદિવ્યબાલં મોક્ષ પ્રદં દિવ્યજનાભિવન્દ્યમ્ ।
કૈલાસનાથ પ્રણવસ્વરૂપં શ્રીભૂતનાથં મનસા સ્મરામિ ॥ ૧॥

અજ્ઞાનઘોરાન્ધ ધર્મ પ્રદીપં પ્રજ્ઞાનદાન પ્રણવં કુમારમ્ ।
લક્ષ્મીવિલાસૈકનિવાસરઙ્ગં શ્રીભૂતનાથં મનસા સ્મરામિ ॥ ૨॥

લોકૈકવીરં કરુણાતરઙ્ગં સદ્ભક્તદૃશ્યં સ્મરવિસ્મયાઙ્ગમ્ ।
ભક્તૈકલક્ષ્યં સ્મરસઙ્ગભઙ્ગં શ્રીભૂતનાથં મનસા સ્મરામિ ॥ ૩॥

લક્ષ્મી તવ પ્રૌઢમનોહર શ્રી સૌન્દર્ય સર્વસ્વ વિલાસરઙ્ગમ્ ।
આનન્દ સમ્પૂર્ણ કટાક્ષલોલં શ્રીભૂતનાથં મનસા સ્મરામિ ॥ ૪॥

પૂર્ણકટાક્ષ પ્રભયાવિમિશ્રં સમ્પૂર્ણ સુસ્મેર વિચિત્રવક્ત્રમ્ ।
માયાવિમોહ પ્રકરપ્રણાશં શ્રીભૂતનાથં મનસા સ્મરામિ ॥ ૫॥

વિશ્વાભિરામં ગુણપૂર્ણવર્ણં દેહપ્રભાનિર્જિત કામદેવમ્ ।
કુપેટ્ય દુઃખર્વ વિષાદનાશં શ્રીભૂતનાથં મનસા સ્મરામિ ॥ ૬॥

માલાભિરામં પરિપૂર્ણરૂપં કાલાનુરૂપ પ્રકાટાવતારમ્ ।
કાલાન્તકાનન્દકરં મહેશં શ્રીભૂતનાથં મનસા સ્મરામિ ॥ ૭॥

પાપાપહં તાપવિનાશમીશં સર્વાધિપત્ય પરમાત્મનાથમ્ ।
શ્રીસૂર્યચન્દ્રાગ્નિવિચિત્રનેત્રં શ્રીભૂતનાથં મનસા સ્મરામિ ॥ ૮॥

ઇતિ શ્રીભૂતનાથમાનસાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by Mohan Chettoor

pdf was typeset on October 8, 2022

Please send corrections to *sanskrit@cheerful.com*